# पाठः २

# प्रशंसायाः प्राप्त्यर्थम्

(पुनःस्मारणपाठः - तृतीया, पञ्चमी, क्त्वा)

पूर्वं कश्चन विग्रहकारः आसीत् । सः स्वपुत्रम् अपि उत्तमविग्रहकारं कर्तुम् इच्छति स्म । अतः सः महता श्रमेण पुत्रं विग्रहनिर्माणकलां बोधितवान् । पुत्रेण अपि मूर्तिनिर्माणकार्यम् आरब्धम् । पुत्रेण निर्मिताः विग्रहाः सुन्दराः उत्कृष्टाः च भवन्ति स्म । जनाः तेन निर्मितस्य विग्रहस्य प्रशंसाम् आरब्धवन्तः । अचिरात् एव तस्य कीर्तिः सर्वासु दिक्षु प्रसृता ।

किन्तु जनकः तेन निर्मितेषु विग्रहेषु कमपि दोषं पश्यति स्म । जनकस्य मुखात् प्रशंसावचनं श्रोतव्यम् एव इति निश्चयं कृत्वा पुत्रः अधिकया श्रद्धया विग्रहनिर्माणं कृतवान् । तस्मात् तस्य कौशलं पूर्वापेक्षया अपि प्रवृद्धम् । अतिसूक्ष्माणाम् अंशानां विषये अपि सः अवधानं दत्त्वा विग्रहं निर्माति स्म । तथापि जनकस्य मुखात् एकमपि प्रशंसावचनं न निर्गच्छति स्म । बहुधा प्रयत्नं कृतवान् अपि सः स्वस्य इच्छायाः सफलतां न प्राप्तवान् ।

एकदा पुत्रः महता परिश्रमेण एकं विग्रहं निर्मितवान् । मित्रद्वारा तं विग्रहं जनकस्य समीपं प्रेषितवान्, जनकस्य प्रतिस्पन्दं ज्ञातुं रहस्यस्थले स्थितवान् च । जनकः तं विग्रहं दृष्ट्वा महता सन्तोषेण - "अहो ! परमसुन्दरः विग्रहः एषः !! एतं निर्मितवान् कलाकारः निश्चयेन अस्ति उत्कृष्टः । एतादृशी प्रतिभा लोके विरला एव" इति प्रशंसावचनानि उक्तवान् ।



एतत् श्रुत्वा नितरां सन्तुष्टः पुत्रः रहस्यस्थानात् बहिः आगत्य सगर्वम् अवदत् - "जनक !

एतस्य विग्रहस्य निर्माणम् अहमेव कृतवान् । अद्य अनन्यगतिकतया भवान् प्रशंसां कृतवान् एव । उत्कृष्टताकारणतः भवान् अत्र एकमपि दोषं दर्शयितुं न शक्तः !''

पुत्रस्य मुखं निर्निमेषं दृष्ट्वा जनकः क्षणात् अनन्तरं सविषादम् उक्तवान् – ''वत्स ! सर्वदा स्मर्तव्यं यत् गर्वः उन्नतेः बाधकः इति । सः सफलताद्वाराणि सर्वाणि पिदधाति । अहम् एतावत्पर्यन्तं प्रशंसां न कृतवान् इति कारणतः भवतः गुणवत्तायाः वर्धनं जातम् । तदर्थं भवान् अहोरात्रं परिश्रमं कृतवान् । एतस्मात् कारणात् भवतः कौशलं प्रवृद्धम् । मम सकाशात् प्रशंसां प्राप्तुम् एव भवान् यदि अद्य विग्रहं कृतवान् तर्हि निश्चितं यत् एतत् भवतः अभिवर्धनस्य अवरोधाय इति ।''

जनकस्य वचनस्य श्रवणात् पुत्रस्य लज्जा अभवत् । स्वस्य दोषं ज्ञात्वा सः जनकं क्षमां प्रार्थितवान् ।

### कठिनशब्दाः

कश्चन – Some one

अतिसूक्ष्माणाम् – Minute

प्रतिभा – Talent

निर्माति – Creates

प्रशंसावचनम् – Appreciation

विग्रहकारः – Sculptor

सकाशात् – From

सगर्वम् – With proud

उत्कृष्टः – Best

प्रतिस्पन्दः – Response

लज्जा – Shyness

कौशलम् – Expertise

निर्निमेषम् – Without blinking

कलाकारः – Artist

सविषादम् – With sorrow

बाधकः – Obstructive

अहोरात्रम् – Over a day and night